CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. D. P. B.

Coll. No. २०२

Title GRAMMAR - a work
on

## CHUNILAL GANDHI VIDYABHAVAN, SURAT

*Shastri Dinmanishankar Pustak-Bhandara*

No.: 202 Subject: Vyākaraṇa.

Title: Anusvara Vyākaraṇam

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9" by 5.1" Extent: 3 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: incomplet, ends abruptly.

॥श्रीगणेशाय०॥ अर्थव ६ धातुः [illegible] सयां तंचेतिसूत्रे तंत्रा
दिनोभयं विवक्षितमिति भावः॥ अर्थवदिति नपुंसकनिर्देशस्यानु
गुणं विशेष्यमध्याहरति शब्दरूपमिति॥ अधातुरप्रत्यय इति॥ पु
ल्लिंगनिर्देशस्तु परवल्लिंगं द्वंद्वतत्पुरुषयोरित्युत्तरपदलिंगवेगेत्वाद्बो
ध्यः इत्याहुः॥ यदि तु धातुभिन्नमित्यर्थं परिसज्यारोपितो धातुरधातुरि
ति व्याख्यायते तदा नपुंसकत्वप्राप्तिशंकैव नास्तीति ज्ञेयं॥ अर्थवदि
ति किं धनं वनमित्यादौ प्रतिवर्णं संज्ञा मा भूत्॥ तस्यां सत्यां स्वादयः स्युः
ननु संख्याकर्मादेरभावान्न भविष्यंतीति चेत् न॥ एकवचनमुत्सर्गतः
करिष्यत इति सिद्धांतात् हुंफ आदिभ्य इव सोर्दुर्वारत्वात्॥ न चार्थवद्ग्रह
णपरिभाषया अनर्थके न स्यादिति वाच्यं॥ तस्या विशिष्टरूपोपादानवि
षयत्वात्॥ ग्राहृहोढ इत्यत्र इति॥ विशिष्टरूपमुपात्तमिति क्व

त्वंतैकदेशस्यानर्थकस्योश्शब्दस्यग्रहणंनेत्युक्तंनह्यत्रतथाविशिष्टरूप
स्योपादानमस्ति ।। यद्यपि धातुरित्यादिपर्युदासेनानर्थवत्त्वंतस्यतेतथा
प्युत्तरार्थमर्थवद्ग्रहणंस्पष्टप्रतिपत्तयेइहैवकृतंनचैकाज्विर्वचन
न्यायेनसमुदायस्यैवसंज्ञास्यान्नावयवानामितिसर्थवद्ग्रहणमिहाप्यर्थ
मितिवाच्यम्समुदायेहिवृत्ते अवयवा अपिहिवृत्ता भवंतिवस्त्रप्रच
तस्त्रहावयवैःप्रचरंतीतिन्यायात् ।। इहतुसमुदायेप्रवृत्तयाप्रातिपरि
कसंज्ञयानावयवानां तत्कार्यसिद्धिरितिवैषम्यात् ।। अतएवयत्रबह
वोहलःसंश्लिष्टास्तत्रद्वयोर्बहूनांचाविशेषेणसंयोगसंज्ञेतिसिद्धांतः
संगच्छते ।। अन्यथात्वदुपन्यस्तन्यायेनसमुदायएवसंयोगसंज्ञाप्रवर्त्तेत ।।
अत्रकेचित् ।। धनंवनमित्यादौप्रतिवर्णंसत्यामपिसंज्ञायांसत्यपिस्वादिषु
परातिःहल्ङ्याब्भ्यादिनासुलोपात् ।। नचनतोपोधस्यजश्त्वंचस्यादिनिरांकध्या

नुपादे धनवनेस्कन्नारण सामर्थ्यात्तदप्रवृत्तेरित्याहुः॥ तदसत्॥ अ
कारान्तोरुत्सत्त्वोरुत्वप्रवृत्तेः यद्यपि समुदितं प्रातिपदिकस्यावयव
त्वेन सुपो लुकि रुत्वं न भवेत्तथापि चिकीर्षतिविभ्रघ्रइत्यादौ रेपदका
रयोः पदांतत्वे सति खरवसानयोरिति विसर्गस्य परोनुनासिकस्य च
प्रसंगादिति दिक्॥ अधातुः किं॥ अहन्॥ धातोः प्रातिपदिकसंज्ञायां
सत्यां निषेधस्याद्यपवादत्वादहन्नित्यत्र हते स्तिपि सिपि वा कृते इतश्चे
तिदकारलोपे हल्ङ्यादिलोपे च प्राक्कृता प्रातिपदिकसंज्ञा नापगतेति
नलोपः प्रातिपदिकांतस्येति नलोपः स्यात्तन्माभूत्॥ अहन्निति रुत्वं रोसु
पीति रत्वं चेह नाशंक्यं लाक्षणिकत्वात्॥ न च कार्यकालपक्षे प्रसयांतत्वेन प
र्युदासात्प्रातिपदिकसंज्ञाभावेन नलोपो न भवेदिति वाच्यं॥ प्रसयलक्षणे
न उक्तपर्युदासाप्रवृत्तेर्नङिसंबुध्योरिति निषेधेन ज्ञापितत्वात्॥ कथमन्य

थाराजे श्यादौ नलोपः स्यात्॥ यद्यपि सुसन्तिपक्षे राजन्शब्दस्य कनिन्प्रत्य
यांतत्वात्कृत्तद्धितेति प्रातिपदिकसंज्ञया राजे श्यादौ नलोपः स्यात्॥ तथा न ङि
संबुध्योरिति निषेधो न ज्ञापक इति कार्यकालपक्षे धातुग्रहणं व्यर्थं तथा
प्यसुसन्तिपक्षे ज्ञापक एवेति कार्यकालेऽपि [illegible]तत्सर्वं कर्त्तव्यं न च सुपो धात्विति
सूत्रे प्रातिपदिकात्पृथग्धातुग्रहणाद्धातोर्नेयं संज्ञेति वाच्यं पुत्रीयतीत्या
दौ प्रत्ययांते धातुग्रहणस्य चरितार्थत्वात्॥ अप्रत्ययः किं॥ हरिषु करोषि॥
अत्र सुप्सियोर्मा भूत्॥ अप्रत्ययांतः किं॥ तत्रैव विभक्त्यंते विनाशायोर्मा
भूत्॥ न चांतवद्भावेन कांडे कुंडे इत्यादौ प्रातिपदिकत्वं स्यादेव तथा च ह्रस्वो॥
नपुंसक इति ह्रस्वः सोरुसन्तिश्च स्यादिति वाच्यं॥ सप्तम्यधिकरणे चेत्यादि
निर्देशेन विभक्त्येकदेशस्यांतवद्भावानभ्युपगमादिति दिक्॥ ननु प्रत्ययप
र्युदासो न कर्त्तव्यः॥ प्रत्ययांतपर्युदासेनैव गतार्थत्वात्॥ व्यपदेशिव

ऽनेन तस्यापि प्रत्ययांतत्वादिति चेन्नैवं प्रत्ययग्रहणे यस्मात्स विहितस्त
दादेर्ग्रहणात् न केवलस्याचातथात्वात्॥ अन्यथा स्कुपेति उनेरपि तदंत
त्वात्सदत्वं स्यात्॥ तथा च हरिषु करीषी सादौ षत्वं न स्यात्॥ सात्पदाद्योरि
ति निषेधात्॥ न च पदत्व विधेर्निरवकाशत्वात् सर्पिषः एष इत्यादौ चरिता
र्थत्वात्॥ अन्ये तु व्याचक्षते॥ कृत्तद्धिते सत्र हि तदंतविधिर्वक्ष्यते॥ तथा
च तद्धितग्रहणस्य तद्धितांतानामेव न त्वन्य प्रत्ययांतानां संज्ञेति नियमा
र्थतामाश्रित्य प्रत्ययांतपर्युदासोऽत्र न कर्त्तव्यः॥ अपवासात्सदाद्योरिति सा
परं॥ उत्तरसूत्रे तद्धितग्रहणं तु विध्यर्थमेवास्तु॥ सातिग्रहणात्प्रत्यय
स्य प्रातिपदिकत्वाभावे तद्धितग्रहणस्योक्तरीत्या नियमार्थत्वे चार्थवद
धातुः प्रातिपदिक-मित्येवसुवच मिति॥ तेषामिको यणचीति सूत्रं व्य

र्थस्यात्॥ तस्मादित्युत्तरस्य वा चेत्तुच्यतु पितुषस इति निर्देशात् ज्ञापकादिष्ट
सिद्धेः॥ आङ्गता विसर्ग्राकारसहितो च आच इति मुललरुछगं योयमपिवि
कल्पेत॥ कालसमयवेला स्विस्यादिज्ञापकादेवद्वत्वाभावसिद्धेः॥ यदिज्ञाप
केन प्रत्याख्यानमयुक्तमिति यदि चाकार प्रश्लेषे एवं तत्र लिंगंमिति मुप
गमेस्त्वाक्षरैरेववर्णं सिध्यति इत्यप्येतत्तु हि अप्रत्यये स्येतदभ्युपग
म्य प्रत्ययपर्युदासे साति ग्रहणलिंगं॥ प्रत्ययांतपर्युदासे तु तद्धितग्रहण
मित्यप्रत्ययमेवावर्ज्य व्याख्यायतां किमनयाकुसृष्ट्येति दिक्॥ अधातुप्र
त्यया विति सिद्धे न भद्वयोपादानमप्रत्ययइत्यस्याव्यत्ति सौकर्यार्थं॥ महासं
ज्ञाकरणंम्युत्सतुरो धातः॥ तथाचार्यवर्णे पद्यते॥ को धातुः किं प्रातिपदि
कं कः प्रत्यय इति उत्यादीन्यप्यु ताच्चानि इहोदाहरणं॥ अमुन्त्यन्निपत्स्य चेद
मेवज्ञापकमिति प्रांचः॥ वस्तुतस्तु व्युत्पन्निपक्षे बहुपरवद्दसार्थं यत्सत्रमिति
ध्येनव्याः॥ तन्नैवं बहुच पूर्वः प्रातिपदिकमित्येव सूत्रतामितिवाच्यं॥ मूलके नो
पदेशमित्यादौ हृदंतत्वेनातिप्रसंगः [illegible] पूर्वस्यापि हृदंतत्वात्॥

[illegible]